दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-143 | 1 | मार्च 15, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रकृष्णद्वादशी
चैत्र 01 प्रविष्ठांशः मङ्गलमयः भवेत्

2 प्रधानमंत्रिणा कृषकाणां कल्याणाय असमराज्ये विविधानां परियोजनानां लोकार्पणं कृतम्

3 खालसा आयुर्वैदिक एवं चिकित्सीयमहाविद्यालयः नंगल कलां इत्यत्र संस्कृतभारत्याः सम्भाषणवर्गस्य समापनम्

4 'भाग्योदयेन बहुजन्म समर्जितेन सत्सङ्गमं च लभते पुरुषो यदा वै। अज्ञानहेतु-कृतमोह-मदान्धकार-नाशं विधाय हि तदोदयते विवेकः।।' इति।

## भारतीयध्वजयुक्त-पोतद्वयं 'शिवालिक', 'नन्दादेवी' च होर्मुज-जल-डमरू-मध्यं सुरक्षितरूपेण उत्तरितवान्



**हिमसंस्कृतवार्ताः** - भारतीयध्वजयुक्त-पोतद्वयं 'शिवालिक', 'नन्दादेवी' च होर्मुज-जल-डमरू-मध्यं सुरक्षितरूपेण उत्तरितवान्। जलपत्तन-पोतपरिवहन-जलमार्गमन्त्रालयस्य विशेषसचिवः राजेशकुमारसिंहः नवदेहल्याम् अन्तर्मन्त्रालयीय-संचारवार्ता सम्बोधयन् एतद्विषये सूचितवान्। सः अवदत् यत् एतौ पोतौ सप्तशताधिक-द्विनवतिसहस्र मीट्रिक-टन-मितम् एलपीजी आनीतः। श्रीसिंहः अग्रे सूचितवान् यत् एतौ पोतौ अस्य मासस्य षोडशः सप्तदश्च दिनाङ्कयोः मुन्द्रा-काण्डला-पत्तनयोः प्राप्स्यतः।

## सर्वकारेण तत्कालप्रभावेण सोनमवांगचुकस्य प्राशासनिक-निरोधः प्रत्याहृतः

**हिमसंस्कृतवार्ताः** - सर्वकारेण तत्कालप्रभावेण सोनमवांगचुकस्य प्राशासनिक निरोधः प्रत्याहृतः, यः गतवर्षस्य सितम्बरमासे राष्ट्रियसुरक्षाधिनियमस्य अन्तर्गतं निरुद्धः आसीत्। गृहमन्त्रालयेन उक्तं यत् गतवर्षे लेहनगरे उत्पन्नायाः गभीर-विधि-व्यवस्था-स्थितेः पृष्ठभूमौ सोनमवांगचुकः निरुद्धः आसीत्। मन्त्रालयेन इतोऽपि उक्तं यत् लोकव्यवस्थां पालयितुं लेहस्य दण्डाधिकारिणा निर्गतादेशानुसारं सः अस्य राष्ट्रियसुरक्षा अधिनियमस्य प्रावधानानाम् अन्तर्गतं निरुद्धः आसीत्। गृहमन्त्रालयेन उक्तं यत् सर्वैः हितधारकैः सह रचनात्मकं सार्थकं च संवादं सुकरं कर्तुं लद्दाखक्षेत्रे शान्तेः, स्थिरतायाः, पारस्परिक-विश्वासस्य च वातावरणं विकासयितुं सर्वकारः प्रतिबद्धः अस्ति।

# प्रधानमन्त्रिणा नरेन्द्रमोदिना असमे कोलकातायां च विविधाः विकास-परियोजनाः शुभारम्भिताः



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणा नरेन्द्रमोदिना कोलकातायां आहत्य अशीत्युत्तर-षडधिक-अष्टादश-सहस्रकोट्यधिक-विविधाः विकास परियोजनाः लोकाय समर्पिताः, शिलान्यसिताः च । अवसरे अस्मिन् प्रवदन् प्रधानमन्त्री प्रोक्तवान् यत् एताः परियोजनाः, पश्चिमबंगाय, पश्चिमीय-भारताय च बहु-लाभप्रदाः भविष्यन्ति। बराक-उपत्यकायाः विकासाय सततं प्रयत्नं करोति तथा च एताभिः परियोजनाभिः व्यापारः यातायातः, वृत्यवसराणि च वर्धिष्यन्ते। तेन सबलं प्रतिपादितं यत् पश्चिम बंगालस्य बहुषु क्षेत्रेषु खडगपुर-मोरेग्राम-एक्सप्रेस-मार्गस्य पूर्णतया आर्थिक गतिविधयः अग्रे सरिष्यन्ति। तेन भणितं यत् केन्द्र-प्रशासनं पश्चिम बंगालस्य रेलवे संसाधन विकासं प्रसृतुं द्रुततया स्वीय-प्रयासाः करोति। इतः प्राक् अस्मिन् एव दिवसे प्रधानमन्त्रिणा नरेन्द्रमोदिना असमे सिल्चरे पञ्चशदोत्तर-पञ्चाशदधिक-त्रयोविंशतिः कोट्यधिक-विविधाः विकास-परियोजनाः शुभारम्भिताः। तेन सिल्चरे अम्बिकापुरे तिसृणां परियोजनानां भूमि-पूजनमपि कृतम्। अस्मिन् अवसरे प्रधानमन्त्री उक्तवान् यत् पूर्वोत्तर-भारतः भारतस्य 'एक्ट ईस्ट-नीतिः' इत्यस्य प्रमुखः भागः वर्तते। बराक-उपत्यका-पूर्व-एशियायाः प्रवेश द्वार रूपेण विकसितं भवति। तेन एतदपि उक्तं यत् सर्वकारः बराक उपत्यकायां-द्वि-गति विषये श्रीमोदिना भणितं यत् कांग्रेस-शासनावधौ एताः विकास-परियोजनाः परोक्षि यूताः। अधुना उत्तर-पश्चिमीय एशियायां प्रशासनं द्रुतगत्या कार्यमाचरति। प्रधानमन्त्रिणा भणितं यत् राष्ट्रिय-नागरिकोपरि युद्ध-सम्बद्ध-दुष्प्रभावं अपाकर्तुं प्रशासनं बहु प्रयासरतो विद्यते।

# सर्वकारेण गृहेभ्यः, चिकित्सालयेभ्यः, शैक्षणिकसंस्थाभ्यः अन्याभ्यः अत्यावश्यकसेवाभ्यश्व अबाधितरूपेण तैलेन्धनस्य आपूर्तेः आश्वासनं दत्तम्

**हिमसंस्कृतवार्ताः** - सर्वकारेण गृहेभ्यः, चिकित्सालयेभ्यः, शैक्षणिकसंस्थाभ्यः अन्याभ्यः अत्यावश्यकसेवाभ्यश्च अबाधितरूपेण तैलेन्धनस्य आपूर्तेः आश्वासनं दत्तम् अस्ति। तैलशोधन-निगमेषु गार्हस्थ्य-एलपीजी इत्यस्य उत्पादनं त्रिंशत्प्रतिशतात् अधिकं वर्धितम्। पेट्रोलियम-प्राकृतिक-वायवेन्धन-मन्त्रालयस्य संयुक्त-सचिवा सुजाता शर्मा नवदेहल्याम् आयोजितायां पश्चिम-एशियायाः साम्प्रतिक-घटनाक्रमाणाम् अन्तर्मन्त्रालयीय-वार्तायाम् इमां सूचनां दत्तवती । सा उक्तवती यत् उपभोक्तृभ्यः प्राथमिकतया वितरणार्थं राज्यसर्वकारेभ्यः वाणिज्यिक-वायवेन्धन-पात्राणि उपलब्धानि कृतानि सन्ति। सा सूचितवती यत् वाहनेभ्यः लोकोपयोगाय पीएनजी तथा सीएनजी इत्यनयोः आपूर्तिः न्यूनतया विना सुनिश्चिता क्रियते। सर्वान् अल्पशो-विक्रेतून् अपि ईधन-वितरण-समये दिशा-निर्देशानां कठोरतया पालनं कर्तुं निर्देशितम् अस्ति तथा च नियमानाम् उल्लङ्घने सति दृढ-कार्याचरणं भविष्यति। सा एतदपि असूचयत् यत् नियमित-आपूर्तेः उपरि अष्ट-चत्वारिंशत्-सहस्र किलोलीटर-मितस्य केरोसिन इति मृत्तिका-तैलस्य अतिरिक्तम् आवंटनं सर्वेभ्यः राज्येभ्यः केन्द्रशासितप्रदेशेभ्यश्च प्रदत्तम् अस्ति। मृत्तिका-तैलस्य वितरणं सुकरं कर्तुं जनपद-स्तरीयानि स्थानानि चिह्नीकर्तुं राज्यानि केन्द्रशासितप्रदेशाश्च निवेदिताः सन्ति।

## सुभाषितम्

**यद्यत्त्यजति कामानां,**
**तत् सुखस्याभिपूर्यते।**
**कामस्य वशगो नित्यं,**
**दुःखमेव प्रपद्यते।।**
**(महाभारत, शान्तिपर्व- १७७/४८)**

अर्थात्- मनुष्य जिस जिस कामना को छोड़ देता है, उस उस की ओर से सुखी हो जाता है। कामना के वशीभूत होकर तो वह सर्वदा दुःख ही पता है।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## एकम् ईरानीय-प्रक्षेपास्त्रम् इराकदेशस्य बगदादनगरे स्थितम् अमेरिकी-दूतावासम् प्रहृत्य तस्य विशाले प्राङ्गणे स्थितं 'हेलिपैड' इति उदग्रयान-स्थानकं क्षतिग्रस्तं कृतवत्।

**हिमसंस्कृतवार्ताः** - एकम् ईरानीय-प्रक्षेपास्त्रम् इराकदेशस्य बगदादनगरे स्थितम् अमेरिकी दूतावासम् प्रहृत्य तस्य विशाले प्राङ्गणे स्थितं 'हेलिपैड' इति उदग्रयान-स्थानकं क्षतिग्रस्तं कृतवत्। ईरानीय-राज्य-प्रसारकेण सूचितं यत् बगदाद-स्थित-अमेरिकी दूतावासे रडार प्रणालीं लक्ष्यं कर्तुम् एकस्य आत्मघाति-ड्रोन-यानस्य उपयोगः कृतः आसीत्। लेबनान देशे नगरस्य दक्षिणभागे एकस्मिन् स्वास्थ्यकेन्द्रे इस्राएल-देशस्य आक्रमणेन द्वादश-संख्यकाः चिकित्सा-कर्मकराः हताः। अमेरिका-देशस्य राष्ट्रपतिः डोनाल्ड ट्रम्पः एकस्मिन् सामाजिक-संचार-पटले सन्देशे उक्तवान् अस्ति यत् सम्पूर्ण पश्चिम-एशिया-क्षेत्रे आधिपत्यं स्थापयितुम् इस्रायल-देशं नाशयितुं च ईरान-देशस्य महत्त्वाकाङ्क्षा आसीत्, परन्तु तेन उद्घोषितं यत् ताः योजनाः इदानीं नष्टाः सन्ति ।

# ‘राष्ट्रं प्रथमम्’ इति भावनया देशाय कार्यं कुर्वन्तु;

## केन्द्रीयविश्वविद्यालयस्य नवमे दीक्षान्तसमारोहे अवदत् उपराष्ट्रपतिः




**हिमसंस्कृतवार्ताः- धर्मशाला।** हिमाचलप्रदेश-केन्द्रीय- विश्वविद्यालयस्य धर्मशालायाः नवमं दीक्षान्तसमारोहं सम्बोधयन् उपराष्ट्रपतिः सी. पी. राधाकृष्णन् महोदयः हिमाचलप्रदेशं देवभूमिं वीरभूमिं च अकथयत्। सः अवदत् यत् हिमाचलप्रदेशेन देशस्य सशस्त्रसेनाभ्यः अनेके वीरपुत्राः प्रदत्ताः, राष्ट्रस्य सुरक्षायां निर्माणे च अस्य प्रदेशस्य महत्त्वपूर्णं योगदानम् अस्ति। सः युनः आहूतवान् यत् ते जीवने सर्वदा राष्ट्रं सर्वोपरि संस्थाप्य ‘राष्ट्रं प्रथमम्’ इति भावनया कार्यं कुर्वन्तु। सहैव सः युवकेभ्यः मादकद्रव्येभ्यः (नशा) दूरे स्थातुं परामर्शं दत्त्वा अवदत् यत् प्रत्येकं यूना दृढनिश्चयेन सह मादकद्रव्येभ्यः ‘न’ इति वक्तव्यं, समाजं च नशामुक्तं कर्तुं योगदानं दातव्यम्।

### ७०० तः अधिकेभ्यः छात्रेभ्यः उपाधयः पदकानि च

दीक्षान्तसमारोहे ७०० तः अधिकेभ्यः मेधाविभ्यः छात्रेभ्यः उपाधयः पदकानि च प्रदत्तानि। अस्मिन् अवसरे उपराष्ट्रपतिः विशेषप्रसन्नतां प्रकटयन् अवदत् यत् अस्मिन् वारे महिलाछात्राणां सङ्ख्या उल्लेखनीयरूपेण अधिका अस्ति। सः सूचितवान् यत् ३२ स्वर्णपदकविजेतृषु २३ छात्राः सन्ति। एतत् अस्य प्रमाणम् अस्ति यत् देशस्य प्रगतौ महिलानां सहभागिता निरन्तरं वर्धमाना अस्ति, ताः च विभिन्नक्षेत्रेषु उत्कृष्टं प्रदर्शनं कुर्वन्ति। सः एतत् महिलासशक्तीकरणस्य सशक्तम् उदाहरणं मन्यते।

### मद्यमुक्त-परिसरस्य निर्माणस्य प्रशंसा

उपराष्ट्रपतिः विश्वविद्यालयेन नशामुक्त- परिसर-निर्माणाय कृतस्य आरम्भस्य प्रशंसां कुर्वन् अवदत् यत् एतत् पदं यूनां नशायाः दुष्प्रभावेभ्यः रक्षणाय स्वस्थसमाजस्य निर्माणाय च अतीव महत्त्वपूर्णम् अस्ति। सः छात्रेभ्यः आग्रहं कृतवान् यत् ते स्वयं अपि नशातः दूरे तिष्ठेयुः समाजे च अस्य प्रति जागरूकतां प्रसारयेयुः।

### अनेके गणमान्याः उपस्थिताः

अस्मिन् अवसरे हिमाचलस्य राज्यपालः कवीन्द्रगुप्तः, हिमाचलप्रदेशस्य कृषिमन्त्री चन्द्रकुमारः, विधानसभायां विपक्षनेता जयरामठाकुरः, सांसदः अनुरागसिंहठाकुरः, सांसदः राजीवभारद्वाजः अन्ये च उपस्थिताः आसन्। कार्यक्रमे विश्वविद्यालयस्य कुलाधिपतिः हरमिन्दरसिंहबेदी, कुलपतिः सतप्रकाशबन्सलः च सह महत्यां सङ्ख्यायां शिक्षकाः, छात्राः, गणमान्याः च उपस्थिताः आसन्। दीक्षान्त-समारोहकाले छात्रेषु विशेषः उत्साहः दृष्टः, उपराष्ट्रपतिः च तेभ्यः भविष्ये देशस्य विकासे समाजस्य उन्नतौ च सक्रियां भूमिकां निर्वोढुं सन्देशं दत्तवान्।

# West Asia Crisis –

## आधारसामग्र्याः न्यूनतया हिमाचलस्य औषध-उद्योगेषु सङ्कटम्; मूल्यानि वर्धितानि, आपूर्तिः बाधिता



**हिमसंस्कृतवार्ताः - बद्दी।** पश्चिम-एशियायां प्रचलतः युद्धस्य प्रभावात् हिमाचलप्रदेशस्य औषध-उद्योगः (Pharma Industry) अपि अस्पृष्टः न जातः। अस्मिन् समये औषध-उद्योगः आधारसामग्र्याः (Raw Material) महत्या न्यूनतया वर्धमान-मूल्यैः च गम्भीर-सङ्कटं अनुभवति। अपक्वद्रव्यस्य मूल्यानि निरन्तरं वर्धन्ते, अपरपक्षे आपूर्तौ जातैः विघ्नैः उत्पादनं निरन्तरं कर्तुं उद्योगानां कृते कठिनं जातम् अस्ति। उद्योग-प्रतिनिधयः वदन्ति यत् वर्तमान-परिस्थितिषु यन्त्रालयानां (Factories) सुचारु-सञ्चालनं महदाह्वानम् अस्ति। अपक्वद्रव्यस्य मूल्येषु प्रायः ४० तः ५० प्रतिशतं वृद्धिः अभवत्, येन उत्पादन-व्ययः (Production Cost) भृशं वर्धितः।'फेडरेशन ऑफ इंडियन इंडस्ट्रीज' इत्यस्य प्रदेशाध्यक्षः चिरञ्जीव ठाकुरः अवदत् यत् उद्योगपतयः अस्मिन् समये द्विगुणितस्य भारस्य सन्मुखीभवन्तः सन्ति। एकतः अपक्वद्रव्यस्य मूल्यानि गगनं स्पृशन्ति, अपरतः आपूर्ति-शृङ्खलायाः (Supply Chain) बाधनेन समये सामग्री न लभ्यते। सः केन्द्रसर्वकारात् अस्याः गम्भीरस्थितेः शीघ्रं सञ्ज्ञानं ग्रहीतुं आवश्यक-पदानि च स्थापयितुं याचनां कृतवान्।उद्योगपतिः सुरेश गर्गः सूचितवान् यत् ईरान-इस्रायल-युद्धस्य प्रभावः वैश्विक-आपूर्ति-शृङ्खलायां जातः, येन केषाञ्चित् आवश्यकानां रसायनानां अपक्वद्रव्यस्य च उपलब्धता प्रभाविता अभवत्। उद्योग-सङ्घटनानां मते यदि शीघ्रं समाधानं न भविष्यति, तर्हि औषध-उत्पादनं गम्भीरतया प्रभावितं भवितुं अर्हति।

# हरियाणा-राज्यसभा-निर्वाचनम्: 'क्रॉस-वोटिंग्' भयेन काङ्ग्रेस-विधायकाः हिमाचलं नीताः

हिमसंस्कृतवार्ताः - शिमला।
हरियाणा-राज्यस्य द्वयोः राज्यसभा-आसनयोः कृते १६ मार्च दिनाङ्के आयोज्यनिर्वाचनात् पूर्वं 'क्रॉस-वोटिंग्', विधायकानां क्रय-विक्रयः (Horse-trading) च इत्यस्य वर्धमानानां आशङ्कानां मध्ये काङ्ग्रेस-दलेन स्वविधायकाः शिमला-समीपस्थं पर्वतीय-पर्यटनस्थलं कुफरी प्रति प्रेषिताः। दृढ-सुरक्षा-व्यवस्थायाः मध्ये काङ्ग्रेसस्य आहत्य ३१ विधायकाः शिमला-नगरतः प्रायः १४ किलोमीटर् दूरे स्थितस्य 'एडवेन्चर रिसॉर्ट्' (गालू, कुफरी) इत्यत्र प्रवासिताः सन्ति। सूचनानुसारं, विधायकाः त्रयाणां 'टेम्पो ट्रैवलर्' यानानां दश-अन्येषां कार-यानानां च दलेन सोलन-मार्गेण कुफरीं नीताः।
सूत्राणि सूचयन्ति यत् एतत् पदं दलस्य शीर्षनेतृत्वस्य' (High Command) निर्देशानुसारं स्वीकृतं, येन महत्त्वपूर्ण-मतदानात् पूर्वं राजनैतिक-विक्रयस्य सम्भावित-प्रयासाः रोद्धुं शक्यन्ते। एतेषां ३१ विधायकानां अतिरिक्तं दीपेन्द्र-हुड्डा सहितं त्रयः सांसदाः हरियाणा-काङ्ग्रेस-प्रदेशाध्यक्षः च अपि तत्र प्राप्ताः।

### निर्वाचनस्य गणितं सङ्घर्षश्च

हरियाणायाः ९० सदस्यीय-विधानसभायां भाजपा-दलस्य पार्श्वे ४८ विधायकाः सन्ति, काङ्ग्रेसस्य पार्श्वे च ३७ सन्ति। निर्वाचन-प्रणाल्याः अनुसारं प्रत्येकं अभ्यर्थिनः विजयाय ३१ मतानि आवश्यकानि सन्ति। भाजपा-अभ्यर्थिनः सञ्जय-भाटिया महोदयस्य विजयः सुनिश्चितः दृश्यते। द्वितीय-आसनाय तु सङ्घर्षः अतीव रोचकः जातः अस्ति। काङ्ग्रेस-दलेन परमवीरसिंह-बौद्धः क्षेत्रे अवतारितः, दलस्य च आशा अस्ति यत् प्रथम-वरीयता-मतैः सः विजयी भविष्यति। अपरपक्षे, निर्दलीय-अभ्यर्थी सतीश-नान्दलः भाजपा-विधायकानां द्वितीय-वरीयता-मतानां विश्वासे अस्ति इति मन्यते।



राजनैतिक-विश्लेषकाणां मते, अङ्कानां एतत् गणितं तादृशीं स्थितिं निर्माति यत्र मतदाने लघु-परिवर्तनमपि परिणामं परिवर्तयितुं शक्नोति। एतेन 'क्रॉस-वोटिंग्' इत्यस्य भयं वर्धितम्। काङ्ग्रेसस्य एषः निर्णयः २०२४ तमे वर्षे हिमाचल-राज्यसभा-निर्वाचने अभवत् तस्य प्रकरणस्य स्मृतिं कारयति, यत्र अभिषेक-मनु-सिंघवी महोदयस्य पराजयः जातः आसीत्। अस्मिन् दले विपक्षनेता भूपेन्द्रसिंह-हुड्डा सहितं कुलदीप-वत्सः, विनेश-फोगाट्, चन्द्रमोहन-बिश्नोई, मोहम्मद-इलियासः तथा परमवीरसिंहः इति षट् विधायकाः न आगताः। हुड्डा महोदयः अवदत् यत् तस्मै विधायकानां स्थानान्तरणस्य सूचना नासीत्, सः च स्पष्टीकृतवान् यत् सर्वे विधायकाः १६ मार्च दिनाङ्के मतदाने भागं ग्रहीष्यन्ति। हिमालयस्य शान्तं कुफरी-स्थलं सम्प्रति अस्य उच्च-स्तरीयस्य राजनैतिक-सङ्घर्षस्य केन्द्रं जातम् अस्ति।

# खालसा आयुर्वैदिक एवं चिकित्सीयमहाविद्यालयः नंगल कलां इत्यत्र संस्कृतभारत्याः सम्भाषणवर्गस्य समापनम्



**हिमसंस्कृतवार्ता।** खालसा आयुर्वैदिक एवं चिकित्सीयमहाविद्यालयः नंगल कलां, मानसा तथा संस्कृतभारती, पञ्जाबप्रान्तः उभयोः संयुक्ततत्त्वाधाने आयोजितायाः संस्कृतसम्भाषण-कार्यशालायाः गतदिने समापनं सञ्जातम्। समापनकार्यक्रमस्य शुभारम्भः दीपप्रज्वालनेन एवञ्च दीपमन्त्रेण सञ्जातः। कार्यक्रमे छात्रछात्राभिः सरस्वतीवन्दना, सङ्कल्पः, उद्देश्यगीतम्, अनुभवकथनम्, गीतमाध्यमेन वस्तुपरिचयः इत्यादयः प्रस्तुतयः कृताः। कार्यक्रमेऽस्मिन् मुख्यवक्तृरूपेण श्रीमान् अजय-आर्य-महोदयः समागतः। महोदयेन संस्कृतं किमर्थं पठामः, 'आयुर्वेदिक पद्धत्यां वैद्यानां कृते संस्कृतं किमर्थम् आवश्यकम्', तथा 'आयुर्वेदस्य सम्यक् ज्ञानं भवितव्यमेव' विषयेषु विचाराः समुपस्थापिताः। कार्यक्रमेऽस्मिन् मुख्यतिथिः डॉ रविदत्तकौशिकमहोदयेन उक्तं यत् संस्कृतभाषा संस्कारमयी भाषा अस्ति, तथा अस्माकं सर्वेऽपि ग्रन्थाः अस्यां भाषायां लिखिताः सन्ति। सम्भाषणशिबिरस्य सञ्चलानं संस्कृतभारत्याः कार्यकत्रा गगनदीपपाठकेन कृतम्। कार्यक्रमेऽस्मिन् ५० प्रशिक्षुकाः भागं गृहीतवन्तः।अस्मिन्नवसरे प्राचार्यया डॉ. मीनाक्षी अरोडा महोदयया आगतानाम् अतिथीनाम् स्मृतिचिह्नेन स्वागतं विहितम्। कार्यक्रमस्य सञ्चालनं डॉ. आशिषेण कृतम्। कार्यक्रमेऽस्मिन् उपप्राचार्यः डॉ. नवीनः, श्री मक्खनलालः सिंगला, संस्कृतप्राध्यापिका डॉ मञ्जुबजाजः, डॉ. मुनीशः महोदयया सह अन्याः अध्यापकाः गणमान्यसदस्याः च समुपस्थिताः आसन्।

# झारखण्डराज्यस्य हजारीबागनगरे अन्तर्जाल-माध्यमेन भव्यं कविसम्मेलनं समायोजितम्




हिमसंस्कृतवार्ताः- दुबे गौरवः
शिक्षायाः आधुनिकस्वरूपमनुसृत्य संस्कृताध्ययन-केन्द्रनामकसंस्थायाः तत्त्वावधाने झारखण्डराज्यस्य हजारीबागनगरे अन्तर्जालमाध्यमेन एकं भव्यं कविसम्मेलनं सद्यः समायोजितम्। अस्मिन् कार्यक्रमे छात्रच्छात्राः स्वकीयप्रतिभां प्रादर्शयन् संस्कृतभाषायास्तथा साहित्यस्य च गरिमाणं प्राकटयन्।
कार्यक्रमस्य शुभारम्भः कोमलया कृतेन मङ्गलाचरणेन समभवत्। अनन्तरं मिश्रसिजल स्वागतगीतं प्रगीय सर्वेषामभिनन्दनं व्यदधात्। अस्य कार्यक्रमस्य मुख्यातिथिः डो॰झापङ्कजः समुपस्थितः आसीत् यः छात्राणां मार्गदर्शनमकरोत्। तस्य गरिमामयी उपस्थितिः कार्यक्रमस्य शोभां समवर्धयत्। अस्य सफलस्य आयोजनस्य सूत्रधारी रामसेवकः मनीषश्च आस्ताम्। मञ्चस्य कुशलसञ्चालनं च गौरवेण सम्पादितम्। सम्मेलनेऽस्मिन् भक्तिसाहित्ययोः अपूर्वः संयोगः अदृश्यत। तत्र सिंहसाधना मधुराष्टकम् ज्योत्स्ना कृष्णाष्टकं निशा च द्वादशज्योतिर्लिङ्गाष्टकम् इत्येतान् प्रास्तुवन्। मिश्रसिजल श्रीपार्वतीवल्लभस्तोत्रं मधुरस्वरेण अपठत्। पीयूषः काव्यपाठम् अकरोत् अञ्जली च मन्दाक्रान्ताशिखरिणीनामकयोः छन्दसोः श्लोकान् अगायत्। शिवानीप्रीती श्लोकैः सर्वान् मन्त्रमुग्धान् अकुरुताम्। चाँदनी कृष्णगीतम् प्रवीणश्च भजगोविन्दनामकं गीतम् अगायताम्। मुस्कान-अंशु- गुञ्जन- सीजल- कोमलाश्च संस्कृतगीतैः स्वकलां प्रादर्शयन्। अञ्जली 'शूरा वयम्' इति नामकं गीतं प्रगीय वीरतायाः भक्तेश्च सन्देशं प्रायच्छत्।
कार्यक्रमान्ते साधना कुलगीतेन समापनम् अकरोत्। मुख्यातिथिः डॉ. झा पङ्कजः छात्राणां प्रयासान् प्राशंसदवदच्च यदेतादृशाः कार्यक्रमाः संस्कृतस्य प्रचारप्रसाराय अत्यावश्यकाः सन्ति ये संस्कृतभाषाकृते संस्कृतेश्च कृते नूतनाम् ऊर्जां प्रयच्छन्ति। सः एकं स्वरचितं गीतमपि अगायत्।अवधेयमस्ति यदन्ते संस्कृताध्ययनकेन्द्रस्य प्रशिक्षकाः रामसेवकः मनीषः गौरवश्च सर्वेषां प्रतिभागिनाम् उत्साहवर्धनम् अकुर्वन् तेषां प्रशंसां च चक्रुः। ते अवदन् यद् आगामिदिवसेषु अपि एतादृशैः कार्यक्रमैः सम्भाषणपाठनैश्च वयं समग्रं समाजम् एकत्रीकर्तुं प्रयतिष्यामहे।


# संस्कृत-छात्रवृत्ति-योजनायां स्वामी विवेकानन्द कनिष्ठमहाविद्यालयस्य उल्लेखनीयम् यशः Central Sanskrit University द्वारा २८ छात्राणां चयनम्; प्रत्येकस्मै ६००० रुप्यकाणां छात्रवृत्तिः




**हिमसंस्कृतवार्ताः- जलगांव, प्रतिनिधिः (अर्जुन शास्त्री)**
जलगांव- नगरस्थितायाः खान्देश कॉलेज एज्युकेशन सोसायटी (KCE) संस्थायाः अधीनस्थेन मुळजी जेठा (स्वायत्त) महाविद्यालयेन सम्बद्धं स्वामी विवेकानन्द कनिष्ठमहाविद्यालयं संस्कृत- छात्रवृत्ति- योजनायां प्रशंसनीयम् यशः प्राप्तवान्। भारतसर्वकारस्य अधीनस्थः केंद्रीय संस्कृत विश्वविद्यालयः, नवदेहलीसंस्थया सञ्चालितायां संस्कृत- छात्रवृत्ति- योजनायां शैक्षणिकवर्षे २०२५–२६ अस्य महाविद्यालयस्य २८ छात्राणां चयनं कृतम् अस्ति। तेषां प्रत्येकं छात्राय ६००० रुप्यकाणां छात्रवृत्तिः अनुमोदिता अस्ति।
भारतीयसंस्कृतेः प्राचीनसमृद्धपरम्परायाः संवर्धनार्थं संस्कृतभाषायाः अध्ययनं प्रोत्साहयितुं केंद्रीय संस्कृत विश्वविद्यालयः संस्थया एषा छात्रवृत्ति- योजना देशव्यापी रूपेण प्रवर्त्यते। अस्यां योजनायां पारम्परिकसंस्कृतपाठशालासु, आधुनिकविद्यालयेषु महाविद्यालयेषु च संस्कृतविषयम् अधीयमानानां मेधाविनां छात्राणाम् आर्थिकसाहाय्यं प्रदीयते। छात्रैः अपेक्षितप्रपत्रैः सह ऑनलाइन- आवेदनप्रक्रिया सम्यक् सम्पन्नं कृत्वा पात्रतानुसारं तेषां चयनं कृतम्। स्वामी विवेकानन्द कनिष्ठ- महाविद्यालयस्य एकादश- द्वादश-कक्षयोः विभिन्नशाखासु अध्ययनरताः छात्राः अस्याः योजनायाः लाभं प्राप्तवन्तः। महाविद्यालये संस्कृतविषये गुणवत्तापूर्णम् अध्यापनं, अनुभवी- शिक्षकाणां मार्गदर्शनम्, अनुकूलं शैक्षणिकवातावरणं च उपलब्धम् अस्ति। तेन कारणेन छात्राणां कृते एतादृशाः शैक्षणिक- अवसराः सुलभतया प्राप्यन्ते इति महाविद्यालय- प्रशासनस्य अभिप्रायः।
अस्य उल्लेखनीयस्य सफलतायाः निमित्तं संस्थायाः अध्यक्षः प्रज्ञावन्तः नन्दकुमार बेंडाळे, प्राचार्यः डा. सं. ना. भारंबे, उपप्राचार्यः प्रा. आर. बी. ठाकरे, पर्यवेक्षिका प्रा. स्वाती बऱ्हाटे, समन्वयकः प्रा. उमेश पाटीलः, संस्कृतशिक्षकः प्रा. अर्जुन शास्त्री मेटे इत्येते सर्वान् छात्रान् अभिनन्दितवन्तः। तैः छात्राणां भावी-शैक्षणिक-प्रयाणाय हार्दिकाः शुभाशंसाः अपि अर्पिताः। महाविद्यालयस्य सर्वे शिक्षकाः शिक्षकेतरकर्मचारिणश्च छात्राणां प्रशंसां कृतवन्तः।

## छात्रवृत्तिप्राप्ताः छात्राः एते सन्ति-

जयंती बालकृष्ण पाटीलः, सुदीप संदीप पाटीलः, अदिति योगेश व्यासः, विनीत राम मखिजा, ऐश्वर्या ज्ञानेश्वर जगतापः, साक्षी दिगंबर धाके, ऋषिका पंकज पाटीलः, गौरंग सतीश सुलक्षणे, यशोदीप बाळू पारखे, प्रिया रविंद्र पाटीलः, दामोदर धनंजय चौधरी, मयुरी चेतन खामकर, ज्ञानेश्वरी भीमराम चौधरी, देवयानी अतुल महाजनः, महिमा मनीष धांडे, दिगंबर शेखर पाटीलः, अशना युसुफ पटेलः, सुरभी रुपेश भक्कडः, तेजल हर्षद कुलकर्णी, प्रथमेश रविंद्र साळुंखे, अथर्व शशिकांत ब्रह्मक्षत्रियः, अथर्व सतीश येवले, दुर्वेश तुषार लगवंकरः, दर्शन दीपक जाधवः, प्रणाली चंद्रकांत नखेंडे, कादंबरी नरेंद्र पाचपांडे, रोहित बापूराव ब्राम्हणकरः, मिताली सचिन चौधरी च। अस्य महाविद्यालयस्य एतादृशेन उल्लेखनीयेन यशसा छात्रेषु संस्कृतविषये नूतना प्रेरणा जागृता अस्ति। भविष्ये अपि अधिकाधिकाः छात्राः अस्याः छात्रवृत्ति-योजनायाः लाभं प्राप्स्यन्ति इति विश्वासः महाविद्यालय-प्रशासनेन व्यक्तः।



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतं मधुरं सदा -०८

अस्मिन् विकरालकलियुगे इदानीमपि जगति महान्तः जनाः प्रायः सर्वेषु कोणेषु उपलभ्यन्ते । परं पूर्वापेक्षा विविधकारणात् सम्प्रति ते किञ्चिन्न्यूनतां गताः परिलक्ष्यन्ते । ये वर्तमानाः सन्ति ते सदैव नमस्याः, लोकपूज्याः च तिष्ठन्ति, नात्र सन्देहः।

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः।।

अस्यां पवित्रभारतभूमौ इदानीमपि बहुधा परमपूजनीयाः परमादरणीयाः अनेके विद्वन्महाभागाः, भागवताचार्याः, ज्योतिषाचार्याः, पुरोहित-पण्डित-महानुभावाः, भूदेवाः गुरुचरणाः विराजमानाः सन्ति । एतद्विशालं विद्वज्जनसमूहं विचार्य शास्त्रोक्ता प्राचीना देवसभा सम्प्रत्यपि यत्र तत्र प्रवर्तते । देवसभा इत्युक्ते सत्सङ्गः, यत्र ज्ञानभक्तिचर्चादिकं सम्भवति । अतः श्रद्धालुजनैः आदरणीयाः महानुभावाः एते सर्वत्र पूज्यन्ते, विनम्रतापूर्वकं सभक्ति च प्रणम्यन्ते । तेभ्यः धन्यवादपूर्वकं स्वागतम् अभिनन्दनादिकञ्च निवेद्यते । स्वान्तःकरणे भगवत्सम्बन्धिकः परमानन्दः अनुभूयते श्रद्धालुभिः, तैश्च धन्यता गम्यते, कृतकृत्यता च अनुभूयते । सम्प्रति काले एतादृशः सत्सङ्गः दुर्लभः एव । परन्तु अधुना पाश्चात्यसंस्कृतिः एव प्रबला जातास्ति सर्वत्र । श्रीमद्भागवतमाहात्म्ये स्पष्टम् उक्तमस्ति यत् -

**'भाग्योदयेन बहुजन्म समर्जितेन**
**सत्सङ्गमं च लभते पुरुषो यदा वै ।**
**अज्ञानहेतु-कृतमोह-मदान्धकार-**
**नाशं विधाय हि तदोदयते विवेकः ।।'** इति ।

यदा मनुष्यस्य जन्मजन्मान्तरेषु सञ्चितपुण्यफलकारणतः भाग्योदयः भवति तदा सः सत्सङ्गं लभते, अन्यथा स दुर्लभः इति श्लोकस्य आशयः ।

भारते ये विप्रपुरोहिताः वर्तन्ते, ते सर्वदा संस्कृतपुस्तकैः सह सम्बन्धं रक्षेयुः, यजमानगृहेषु शुद्धकर्मकाण्डं निर्वहेयुः । यतोहि अस्माकं सनातनधर्मसंस्कृतेः वाहकाः यावन्तः संस्कृतग्रन्थाः सन्ति, ते ग्रन्थाः संस्कृतेन हि लिखिताः प्राप्यन्ते । यथा वेदोपनिषदादयः, पुराणानि, रामायणमहाभारतादीनि काव्यशास्त्राणि, कर्मकाण्डविषयभूताः श्राद्ध-अग्निस्थापनादयः कर्मकाण्डीयग्रन्थाः सर्वेऽपि संस्कृतेन हि लिखिताः सन्ति । एवं स्थिते यदि वयं संस्कृतं न जानीमः, अस्मासु भाषाबोधः हि न स्यात् तर्हि वयं सम्यक्तया विधिपूर्वकं वा यज्ञपूजादिकर्म विधातुं न शक्नुमः । अतः सर्वदौ अस्माभिः ब्राह्मणैः अन्यैस्सर्वैश्च अवश्यमपि संस्कृतं ज्ञातव्यमेव । अन्यथा कर्मसु दोषः उद्भवेदिति भयम् । ब्राह्मणानाम्, इतरेषां च सर्वेषां मुख्यबलं हि संस्कृतम् । संस्कृतात् हि सर्वेषां भारतीयानां तेजो वर्धते, जीवने सुसंस्कारः आयाति, चित्तं निर्मलं जायते, भक्तिविनयादिभावः उद्भवति, समाजे शान्तिसम्प्रती सम्भवतः चेति एतादृशाः सद्गुणाः सामाजिकजनैः जीवने अनुभूयन्ते । अतः संस्कृतं शास्त्रञ्च सर्वैरपि अध्येतव्यम् । नैव कठिना भाषेयम्, अत्यन्तं सरला, सुबोध्या, रसयुक्ता च वर्तते । एतस्याः सामान्यतया अनुशीलनेन एव एषा सहजतया मनुष्याणां हृदये निवसति, अन्तःकरणस्य औदार्यं वर्धयति, सङ्कीर्णताम् अपगमयति च । अतः संस्कृतेन पठनलेखनसम्भाषणादिकार्यं सर्वैः सदृढम् अङ्गीकर्तव्यञ्चेत् भारतगौरवम् इतोऽपि वर्धमानं भवेत्, उच्चशिखरञ्च प्राप्नुयात् । एवं क्रमेण, गच्छता कालेन च अस्मद्देशो विश्वगुरुः भवितुमर्हिष्यति इत्यत्र न संशयः इति, शुभम् ।

# येषां ई-केवाईसी (e-KYC) न जातं, तेषां सत्यापनम् अधुना

## तहसील- कल्याण- अधिकारिणः करिष्यन्ति

**हिमसंस्कृतवार्ताः- शिमला**।सामाजिक-सुरक्षा-निवृत्तिवेतनाय येषां लाभार्थिनां ई-केवाईसी अद्यापि न अभवत्, तेषां सत्यापनस्य दायित्वम् अधुना तहसील-कल्याण-अधिकारिणः निर्वोक्ष्यन्ति। पूर्वं एतत् कार्यम् आङ्गनवाड़ीकर्त्रीभ्यः दत्तम् आसीत्, किन्तु अधुना विभागेन अधिकारिणः एव नियुक्ताः। ये लाभार्थिनः ई-केवाईसी न कृतवन्तः अथवा ये मृताः इति सूचिताः, तेषां वास्तविकस्थितेः निरीक्षणं तहसीलस्तरे भविष्यति। सूचनानुसारं राज्ये प्रायः ४७,९७३ तादृशाः निवृत्तिवेतनधारिणः सन्ति, येषां ई-केवाईसी प्रक्रिया अपूर्णा अस्ति। वास्तविक-पात्र-जनानां परिचयाय विभागेन एषः निर्णयः स्वीकृतः। तहसील-कल्याण- अधिकारिणः एतस्य कारणम् अन्वेक्ष्यन्ति यत् निश्चितसमये ई-केवाईसी किमर्थं न जातम्। तेषाम् आय-निवास-प्रमाणपत्राणां पात्रतायाः च पुनः परीक्षणं भविष्यति। विभागस्य मतेन अनेन पदेन अपात्रजनेभ्यः दीयमानं निवृत्तिवेतनं रोत्स्यते, येन वास्तविक-निर्धनेभ्यः योजनायाः लाभः प्राप्तुं शक्येत। उल्लेखनीयं वर्तते यत् ई-केवाईसी माध्यमेन ४४,३६४ लाभार्थिनः मृताः इति अङ्किताः, ६ सहस्रं जनाः अपात्राः तथा ६७० जनानां किमपि विवरणं न प्राप्तम्।

# २८ फरवरी दिनाङ्कतः स्थगिता ई-केवाईसी प्रक्रिया

सर्वकारेण २८ फरवरी दिनाङ्कतः ई-केवाईसी प्रक्रिया स्थगिता अस्ति। अद्यावधि केवलं ७ लक्षं लाभार्थिनः एव ई-केवाईसी कृतवन्तः, यदा तु पूर्वं निवृत्तिवेतनधारिणां सङ्ख्या ८ लक्षतः अधिका आसीत्। अतः अधुना अवशिष्टानां लाभार्थिनां सत्यापन-कार्यं आरप्स्यते।

## ९८ सहस्रं लाभार्थिनः योजनातः बहिः भविष्यन्ति

अस्मिन् वारे प्रायः ९८ सहस्रं लाभार्थिनः निवृत्तिवेतन-योजनातः बहिः भविष्यन्ति। विभागः केवलं ७ लक्षं लाभार्थिभ्यः एव निवृत्तिवेतनं दास्यति। अस्मिन् अन्तरे ३० सहस्रं नूतनाः लाभार्थिनः योजनायां योजयितुं शक्यन्ते।



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी** - नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या** - नमस्ते नन्दिनि। मया अद्य एका चिन्ताजनिका वार्ता पठिता। एकेन कर्मकरेण अस्वस्थता-कारणात् अवकाशः याचितः। परन्तु संस्थापकेन अवकाशः न स्वीकृतः। तेन तस्य वेतनम् अपि कर्तितम्।

**नन्दिनी** - एतत् अतीव दुःखकरम्। स्वास्थ्यापेक्षया कार्यं महत्त्वपूर्णं न भवति। अन्या काचित् आनन्ददायिनी वार्ता मया ज्ञाता। एकस्मिन् विदेशनगरे एकया भारतीय-महिलया स्व-गृहस्य कुञ्चिकाः हारिताः। एकेन अपरिचितेन जनेन ताः कुञ्चिकाः प्राप्ताः। सहानुभूत्या तेन ताः कुञ्चिकाः तस्यै महिलायै प्रत्यर्पिताः।

**काव्या** - सत्यम्, अद्यापि लोके सज्जनाः सन्ति। अन्यदेकं नूतन-विचारस्य उदाहरणं मया दृष्टम्। एकेन छात्रेण पञ्चविंशति-सहस्र-रूप्यकाणां वृत्तिः त्यक्ता। तेन धनस्य स्थाने ज्ञानार्जनं चितम्। अतः तेन एकस्मिन् नवोद्यमे एव कार्यम् आरब्धम्।

**नन्दिनी** - शोभनम्! नूतन-युवकानां विचारः प्रशंसनीयः। अन्ते चीनदेशस्य एका आश्चर्यकरी वार्ता मया श्रुता। तत्र पञ्चाशत्-वर्षेभ्यः एका वृद्धा चिकित्सालयं न गतवती अस्ति। सा द्व्यधिक-शत-वर्षीया अस्ति तथापि अतीव स्वस्था अस्ति। तस्याः स्वास्थ्यस्य रहस्यं सरले भोजने शान्ते स्वभावे च निहितम्।

**काव्या** - एतत् अतीव उत्तमम्। सरल-जीवनेन एव उत्तमं स्वास्थ्यं प्राप्यते। अद्यतन-वार्ताः अत्रैव समाप्ताः।

डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम् ©®

# *सुभाषितरसास्वादः*"

### " *वाग्वर्णनम्*"

श्लोकः-- गानाब्धेस्तु परं पारं नोपायाय सरस्वती।
अतो निमज्जनभयात्तुम्बीं वहति वक्षसि ।।

अर्थः--सङ्गीतम् एकम् अपारं / विशालं समुद्रम् अस्ति।वाक्-सङ्गीत-देवी सरस्वत्या अपि अस्य सङ्गीतसागरस्य तरणं कष्टम् अनुभवति स्म।अतः अस्मिन् सागरे मज्जनभयात् सा हस्ते कुष्माण्डस्य वीणां गृहीतवान् अस्ति |

गूढार्थः-- उक्तिलेखकस्य/ सुभाषितकारस्य उत्तुंगप्रतिभा अत्र दृश्यते।देवी सरस्वती अपि सङ्गीतसागरस्य सीमां न जानाति, एतावता विशाला अस्ति |

सङ्गीतसागरे मज्जनभयात् एव सा कुष्माण्डधारी वीणां हस्ते धारयति |

डॉ.विदुषीअग्रवालः

# हास परिहासम्

**पत्नी** — अद्य वार्तापत्रिकायां नूतनः नियमः आगतः। यः मंगलसूत्रं चोरिष्यति, तं द्वौवर्षस्यकृते कारावासः भविष्यति।

**पतिः** - पूर्णं रूपेण सम्यक् नास्ति, यः मंगलसूत्रं परिदपयति - तं तु आजीवनकारावासः भवति 😞😞😞😞😞😞😞

**पत्नी** - 😳😳😳😳😠😠😠😠😠